COMPLIED AND CIRCULATED BY PROF. DR. RABINDRANATH MAITI
DEPARTMENT OF SANSKRIT, NARAJOLE RAJ COLLEGE

## ''सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते'' इत्यस्य व्याख्या

मम्मटानुसारं (स्याद् वाचको लाक्षणिक: शब्दोऽत्र व्यञ्जकस्त्रिधा) न केवलं शब्द: व्यञ्जक: भवितुमर्हति, अपि तु प्रायश: सर्वेषामर्थानामपि व्यञ्जकत्वं वर्त्तते। अत्र प्रायश: इति पदस्य वैशिष्ट्यम् इदं यत् - यद्यापि रसरुपार्थ: व्यङ्ग्यार्थ: वर्त्तते तथापि वस्त्वलङ्कारव्यंग्यवत् तस्मात् रसरूपव्यङ्ग्यार्थात् अपरस्य व्यंग्यार्थस्य उदय: न भवति। अत: प्रायश: इति लिखितं मम्मटेन। वाच्यार्थस्य व्यञ्जकत्वे अर्थान्तप्रतीतिस्थलम् –

'मातर्गृहोपकरणमद्य नास्तति साधितं त्वया।
तद्भण किं करणीयमेवमेवं न वासर: स्थायी।।

अत्रोदाहृते पद्ये व्यभिचारिणी वदतीति वक्तृवैशिष्ट्यरूपवाच्यार्थत् (हे मात! आवश्यकानि द्रव्याणि अस्माकं गृहे न विद्यन्ते इति प्रागेव पर्यालोचितम्। अधुना अहं बहिर्गत्वा तानि आनेष्यामि, यत: सायंकाल: सन्निकट: इति वाच्यार्थात्) इयं उपपतिसङ्गमाभिलाषिणीति सहृदयै: बुध्यते व्यञ्जनया। सायंकाल: पूर्वं नायिकया सङ्केतकालत्वेन निरूपित:। अधुना सायंकालस्य निकटवर्तित्वात् इयं व्यभिचारिणी उपनायकेन सह मिलितुमिच्छतीति व्यङ्ग्यार्थबोध: वाच्यार्थबोधानन्तरं जायते। अत: वाचयार्थस्य व्यञ्जकत्वे उदाहरणमिदं साधु सङ्गच्छते। लक्ष्यार्थस्य व्यञ्जकत्वम् –

साधयन्ती सखि! सुभगं क्षणे क्षणे दूनासि मत्कृते।
सद्भावस्नेहकरणीयसदृशकं तावत् विरचितं त्वया।।

अत्र पद्ये नायिका कथयति - 'हे सखि! नायकेन सह मम मिलनकार्ये त्वया अतीवकष्टं स्वीकृतम्। एतदेव तव साधुस्वभावस्य समीचीनं कार्यम्। अयं तावत् वाक्यार्थ:। अस्मात् वाच्यार्थात् प्रत्यक्षविलोकितनखक्षत कृशत्वादिप्रियोपभोगचिह्नयोगात् विपरीतलक्षणया मयि शत्रुत्वमाचरितमिति लक्ष्यार्थ:। एतेन कामुकस्य दूतीसम्भोगात् तद्विषकापराधप्रकाशनत्वं व्यज्यते। व्यंग्यार्थस्य व्यञ्जकत्वम् –

पश्य निश्चलनिस्पन्दा विसिनीपत्रे राजते बलाका।
निर्मलमकतभाजनोपरिस्थिता शंखशुक्तिरिव।।

अत्र पद्ये काचित् उद्दामयौवनसन्नद्धा कामुकी स्वकामुकं ब्रवीति ‘पुष्करिण्यामत्र पद्मपत्रे स्तिता काचित् वकयोषित् मरकतस्थानोपरिस्थिता शङ्खसदृशी शोभते तामवलोकय इति वाच्यार्थः। अस्मात् वाच्यार्थात् अस्य स्थानस्य भयहीनता व्यज्यते। (निश्चलनिस्पन्दपदयोगात्) यदि स्थानमिदं भयस्यास्पदं स्यात् तर्हि वकयोषित् निश्चला निस्पन्दा च न तिष्टेत्। अस्मात् व्यङ्ग्यार्थात् जनशुन्यता अस्य स्थानस्य इत्यपि व्यज्यते, अपि च इतः प्रागेव त्वया अत्र नागतमिति व्यंग्यार्थस्य ज्ञानं भवति। उदाहृते पद्ये व्यंग्यार्थात् व्यंग्यार्थस्य उदययोगात् व्यञ्जकत्वमपि व्यंग्यार्थस्य वर्त्तते। अतः सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वम् अस्तीति यदुक्तं ग्रन्थकृता तत् अनेन प्रकारेण सोदाहरणं समाहितम्।